नामांक Roll No.

No. of Questions – 23

No. of Printed Pages – 12

# SS-12-Sanskrit Sah.

## संस्कृत साहित्यम्

## उच्च माध्यमिक परीक्षा, 2022

समय : 2:45 (पादोन होरात्रयम्)

पूर्णाङ्क : 80

downloaded from StudentSuvidha.com

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।



Download all NOTES and PAPERS at StudentSuvidha.com

खण्ड - अ

1. अधोलिखितानां प्रश्नानाम् उचितं विकल्पं चित्वा लिखत -

(i) विद्यया किम् अश्नुते?

(अ) धनम्

(ब) अमृतम्

(स) बलम्

(द) शक्तिम्

(ii) वरतन्तुशिष्यः कः आसीत् ?

(अ) कौत्सः

(ख) रघुः

(स) रामः

(द) कुबेर:

(iii) उत्पथैः कस्य मनः पारिप्लवं धावति ?

(अ) लवस्य

(ब) रामस्य

(स) कौशल्यायाः

(द) जनकस्य

(iv) 'रघुकौत्ससंवादः' इति पाठः कस्मात् ग्रन्थात् संकलित: ?

(अ) रामायणात्

(ब) महाभारतात्

(स) रघुवंशात्

(द) कुमारसम्भवात्

downloaded from StudentSuvidha.com

(v) शुकनाशः कम् उपदिशति ?

(अ) श्रीहर्षम्

(ब) तारापीडम्

(स) शूद्रकम्

(द) चन्द्रापीडम्

(vi) कीदृशे मनसि उपदेशगुणाः प्रविशन्ति ?

(अ) अपगतमले

(ब) समागतमले

(स) स्वागतमले

(द) अत्यागतमले

(vii) प्रोद्दीप्ते भवने किं नोचितम् ?

(अ) बहिर्गमनम्

(ब) कूपखननम्

(स) जलसेचनम्

(द) मृत्क्षेपणम्

(viii) पृथिव्याः कति भेदाः ?

(अ) सप्त

(स) त्रयः

(ब) पञ्च

(द) चत्वारः

(ix) 'सच द्विगुणितो मेघमालाभिः।' अत्र 'सः' सर्वनामपदस्थाने संज्ञापदं किम् ?

(अ) झञ्झावातः

downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

(ब) सायं समयः

(स) अन्धकारः

(द) स्वभावावृत्तः

(x) 'यथेच्छं निर्दयं च पशुघातं कुर्वन्ति।' रेखाङ्कितपदस्य विलोमार्थकं पदं किमस्ति ?

(अ) यथेच्छं

(स) पशुघातं

(ब) सदयम्

(द) कुर्वन्ति

(xi) 'अश्रुधारा आर्द्रीकरोति स्म पत्रस्य अर्धाधिकभागम् ।' अत्र कर्तृपदं किम् ?

(अ) पत्रस्य

(ब) आर्द्रीकरोति

(स) अर्धाधिकभागम्

(द) अश्रुधारा

(xii) षोडशवर्षदेशीयो गौरो युवा कः आसीत् ?

(अ) राजकुमारचन्द्रापीडः

(ब) शिववीरचरः

(स) मन्त्रिशुकनाशः

(द) महाराजरघुः

2. अधोलिखितानि रिक्तस्थानानि निर्देशानुसारं पूरयत -

(क) प्रकृतिप्रत्ययस्य संयोगं कुरुत -

(i) पुस्तकं _____ गीतं गायति । (पठ् + शतृ)

(ii) उद्यानं ____ विचरामि । (गम् + क्त्वा)

(ख) प्रकृतिप्रत्ययस्य विभागं कुरुत -

downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

(i) वचसा सततं ______। (वदनीयम्)

(ii) यथाशक्ति दानं ______ । (दातव्यम्)

(ग) उचितं विभक्तिप्रयोगं कुरुत

(i) मोहनः _____ उपवसति । (ग्राम)

(ii) बालकः ______ बिभेति । (सिंह)

3. (क) अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -

(i) वेदानाम् अन्तिमो भागः कः ?

(ii) संगीतशास्त्रस्य आधारः कः वेदः अस्ति ?

(iii) महाकविसुबन्धुकृतः एक एव प्रसिद्धः ग्रन्थः कः ?

(iv) 'अभिज्ञानशाकुन्तलम्' इति नाटकं केन रचितम् ?

(v) अर्थगौरवं कस्य प्रसिद्धम् अस्ति ?

(vi) 'हरनामामृतम्' महाकाव्यस्य नायकः कः ?

(vii) मानवंशमहाकाव्यस्य प्रणेता कः ?

(viii) 'लेनिनामृतम्' महाकाव्यस्य प्रधानरसः कः ?

(ix) 'चन्द्रमहीपतिः' उपन्यासस्य प्रणेता कः ?

(x) 'प्रबन्धमञ्जरी' ग्रन्थस्य रचयिता कः ?

downloaded from StudentSuvidha.com

(ख) अधोलिखितयोः रेखाङ्कितपदयोः सूत्रोल्लेखपूर्वकं विभक्तिनिर्देशं कुरुत -

(i) <u>शिक्षकेन</u> सह छात्रः गच्छति ।

(ii) <u>हिमालयात्</u> गङ्गा प्रभवति ।

खण्ड - ब

4. अधोलिखितछन्दसां कस्यचिदेकस्य लक्षणोदाहरणं च लिखत-

(i) उपजातिः

(ii) अनुष्टुप्

Download all NOTES and PAPERS at StudentSuvidha.com

5. अधोलिखितयोः पद्यांशयोः कस्यचिदेकस्य गणचिह्न प्रदर्शयन् छन्दसः नामोल्लेख कुरुत -

(i) त्वमेव माता च पिता त्वमेव ।

(ii) पापान्निवारयति योजयते हिताय ।

6. अधोलिखितेषु अलङ्कारेषु द्वयोः अलङ्कारयोः लक्षणोदाहरणं च लिखत -

(i) यमकम्

(ii) श्लेषः

(iii) अर्थान्तरन्यासः

7. अधोलिखितयोः एकस्य अलङ्कारस्य नामोल्लेखं कुरुत -

(i) वहन्ति वर्षन्ति नदन्ति भान्ति ।

(ii) निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।

8. अधोलिखितप्रश्नयोः उत्तराणि लिखत -

(i) आदिलघुः कः गणः भवति ?

(ii) उपमानेन उपमेयस्य सम्भावना कस्मिन् अलङ्कारे भवति ?

9. अधोलिखितस्य पद्यस्य अन्वयं कुरुत -

विद्यां चाविद्यां च यस्तद्वेदोभयं स ह ।

अविद्यया मृत्युं तीर्त्वा, विद्ययाऽमृतमश्नुते ॥

अथवा

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।

वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।।

10. अधोलिखितानां शब्दानाम् अर्थं लिखत -

downloaded from StudentSuvidha.com

(i) उत्सङ्गे

(ii) मातरिश्वा

(iii) सदसि

(iv) प्रपेदे

11. अधोलिखितयोः पदयोः सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -

(i) सत्कारः

(ii) उपेन्द्रः

12. अधोलिखितपदयोः सूत्रोल्लेखपूर्वकं सन्धिं कुरुत -

(i) जन + एकता

(ii) वाक् + ईश:

अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-

इदं हि विज्ञानप्रधानं युगम् । 'विशिष्टं ज्ञानं विज्ञानम्' इति कथ्यते । अस्यां शताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो दरीदृश्यते । अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साहाय्यं नापेक्षते । आवागमने, समाचारप्रेषणे, दूरदर्शने, सम्भाषणे, शिक्षणे, चिकित्साक्षेत्रे, मनोरञ्जनकार्ये, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि, तथैवान्य कार्यकलापेषु विज्ञानस्य प्रभावस्तदपेक्षा च सर्वत्रैवानुभूयते ।

सम्प्रति मानवः प्रकृतिं वशीकृत्य तां स्वेच्छया कार्येषु नियुङ्क्ते । तथाहि वैज्ञानिकैः अनेके आविष्काराः विहिताः । मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्त्रनिर्माणे एवं विशेषतः उपयोगः विहितः । तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निर्घृणं च । अतः अस्य मानवकल्याणार्थमेव प्रयोगः करणीयः ।

13. एकपदेन उत्तरत -

(i) इदं युगं कीदृशम् ?

(ii) कैः आविष्काराः विहिताः ?

downloaded from StudentSuvidha.com

14. पूर्णवाक्येन उत्तरत -

(i) विज्ञानं किं कथ्यते ?

(ii) परमाणुशक्तेः कस्मिन् उपयोगो विहितः ?

15. भाषासम्बद्धकार्यम् -

(i) 'लोकध्वंसकार्यम् अतिघोरं निर्घृणं च' अस्मिन् वाक्ये विशेष्यपदं किम् ?

(ii) अतः अस्य मानवकल्याणार्थमेव प्रयोगः करणीयः अत्र 'अस्य' इति पदस्य स्थाने संज्ञापदं किम् ?

(iii) 'एकत्र' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत

(iv) 'मानवः प्रकृतिं कार्येषु नियुङ्क्ते ।' अस्मिन् वाक्ये कर्तृपदं किम् ?

16. उपर्युक्तगद्यांशस्य समुचितं शीर्षकं लिखत ।

खण्ड-स

17. अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसङ्गहिन्दीभाषया भावार्थं लिखत-

(i) 'स्वर्गभूमिं कुर्शीति वदन्ति ।'

(ii) यो यस्य मित्रं नहि तस्य दूरम् ।

(iii) सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।

(iv) नाशयति च पुरुषमत्यासङ्गो विषयेषु ।

18 अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत -

भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः । गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् । विशेषेण तु राज्ञाम् । विरला हि तेषाम् उपदेष्टारः। राजवचनमनुगच्छति जनो भयात् ।

प्रश्नाः

downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

(i) जनो भयात् कम् अनुगच्छति ? (एकपदेन उत्तरत)

(ii) गुरूपदेशः कीदृशं स्नानं वर्तते ? (पूर्णवाक्येन उत्तरत)

(iii) 'विरला हि तेषाम् उपदेष्टारः।' अत्र 'तेषाम्' सर्वनामपद-स्थाने संज्ञापदं लिखत ।

अथवा

श्रीनायारस्य दायित्वग्रहणस्य एकमासाभ्यन्तरे बहुदिनेभ्यः स्थगितानां विविधसमस्यानामपि समाधानं जातम् । सर्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य परमधर्मः । सः प्रतिमासं प्रथमदिवसे स्ववेतनस्य अर्धाधिकं भागं केरलं प्रेषयति स्म । तेनानुमीयते तस्य राज्येन सह अस्ति कश्चित् सम्पर्कः ।

प्रश्नाः

(i) श्रीनायारः स्ववेतनस्य भागं कुत्र प्रेषयति स्म ? (एकपदेन उत्तरत)

(ii) विविधसमस्यानां समाधानं कदा जातम् ? (पूर्णवाक्येन उत्तरत)

(iii) 'तस्य राज्येन सह अस्ति कश्चित् सम्पर्कः ।' अस्मिन् वाक्ये क्रियापदं किम् ?

19. अधोलिखितं पद्यं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-

प्रश्ना:

जनस्य साकेतनिवासिनस्तौ,
द्वावप्यभूतामभिनन्द्यसत्त्वौ।
गुरुप्रदेयाधिकनिःस्पृहोऽर्थी,
नृपोऽर्थिकामादधिकप्रदश्च।।

(i) गुरुप्रदेयाद् अधिकं धनं कः न स्वीकरोति ? (एकपदेन उत्तरत)

(ii) कौ अभिनन्द्यसत्त्वौ अभूताम् ? (पूर्णवाक्येन उत्तरत)

(iii) 'अभूताम्' इति क्रियापदस्य कर्तृपदं किम् ?

अथवा

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजा ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,

downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।

(i) पुरुषं का समलङ्करोति ? (एकपदेन उत्तरत)

(ii) कीदृशं भूषणं न क्षीयते ? (पूर्णवाक्येन उत्तरत)

(iii) 'क्षीयन्ते' क्रियापदस्य कर्तृपदं किम् ?

20. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत -

लवः : (सगर्वम्) अहो ! संदीपनान्यक्षराणि ।

बटवः : किमुच्यते ? प्राज्ञः खलु कुमारः ।

लवः : भो भोः ! तत्किमक्षत्रिया पृथिवी ? यदेवमुद्घोष्यते । (नेपथ्ये) रे, रे, महाराजं प्रति कः क्षत्रियः ?

लवः : धिग् जाल्मान् ।

यदि नो सन्ति सन्त्येव केयमद्य विभीषिका ।

किमुक्तैरेभिरधुना तां पताकां हरामि वः ।।

हे बटवः ! परिवृत्य लोष्ठैरभिघ्नन्त उपनयतैनमश्वम् ।

एष रोहितानां मध्येचरो भवतु ।

प्रश्नाः

(i) रोहितानां मध्येचरः कः भवतु ? (एकपदेन उत्तरत)

(ii) 'महाराजं प्रति कः क्षत्रियः ?' अत्र महाराजपदं कस्य कृते प्रयुक्तम् ? (पूर्णवाक्येन उत्तरत)

(iii) 'संदीपनानि अक्षराणि' इत्यत्र विशेषणपदं किम् ?

अथवा

लवः : (प्रविश्य, स्वगतम्) अविज्ञातवयः क्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये ? (विचिन्त्य) अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते । (सविनयमुपसृत्य) एष वो लवस्य शिरसा प्रणामपर्यायः ।

अरुन्धतीजनकौ : कल्याणिन् आयुष्मान् भूयाः ।

कौशल्या : जात ! चिरं जीव ।

downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

अरुन्धती : एहि बत्स ! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः ।

प्रश्नाः

(i) लवः कस्य उत्सङ्गे उपविष्टः ? (एकपदेन उत्तरत)

(ii) "जात ! चिरं जीव ।" इति का उक्तवती ? (पूर्णवाक्येन उत्तरत)

(iii) शीघ्रम् इति पदस्य विलोमपदं नाट्यांशात् चित्वा लिखत ।

खण्ड - द

21. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केचित् चत्वारः)

(i) भगवान् <u>त्वां</u> दीर्घजीवनं कारयतु ।

(ii) राजा <u>सिंहासने</u> उपवेष्टुं गच्छति ।

(iii) रघुः <u>विश्वंजित् नामकम्</u> अध्वरम् अनुतिष्ठति स्म ।

(iv) निर्मला बुद्धिः <u>यौवनारम्भे</u> कालुष्यमुपयाति ।

(v) <u>मनुष्याणां</u> हिंसावृत्तिस्तु निरवधिः ।

(vi) पृथिव्याः <u>दार्शनिकैः</u> सप्तधा विभागः कृतः ।

downloaded from StudentSuvidha.com

22. निम्नलिखितवाक्यानां संस्कृतानुवादं कुरुत (केचित् चत्वारः)

(i) कामेश मधुर फल खाता है।

(ii) हरिण तेज दौड़ता है ।

(iii) कृष्ण के साथ राधा नाचती है।

(iv) बालक को मिठाई अच्छी लगती है ।

(v) चोर राजा से डरता है ।

(vi) कवियों में कालिदास श्रेष्ठ है ।

23. अधोलिखितयोः कमपि विषयं स्वीकृत्य 50-60 शब्देषु संस्कृतभाषायां लघुनिबन्धं लिखत-

Download all NOTES and PAPERS at StudentSuvidha.com

'विद्यायाः महत्त्वम्'

अथवा

'मम प्रियग्रन्थः'

downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com